श्री अन्नपूर्णा स्तवः

श्री अन्नपूर्णा स्तवः

विश्वेश्वरीं वरेण्यां विश्वाश्रयणीं विशिष्टफलदात्रीं |
स्तोष्यामि वांछिताप्त्यै स्तोत्रैरन्नाधिनायिकामंबां ||1||

कांचनरत्नविचित्रां दवीं दधतीं तथान्नपात्रं च |
कष्टदरिद्रार्तिहरामंबां प्रणतोऽस्मि संपदां वृद्ध्यै ||2||

सर्वाभिलाषपूरणकल्पकलतिकान्नपूर्णाख्या |
दारिद्र्यदोषमुग्रं शमयतु सकलार्थवृद्धिदानेन ||3||

अन्नाधिनायिकायाः कृपाघना दुःखधर्मपरितप्ते |
मयि दारिद्र्यऋणघ्न्या वर्षतु धनधान्यधारया सुचिरं ||4||

वेदादिर्भुवनाह्वद्भगवति माहेश्वरीति चान्नांते |
पूर्णेऽग्निवल्लभा स्यादुक्तोऽयं मनुरशेषफलदायी ||5||

गुरुकारुण्याल्लब्धं मंत्रमिदं दिनमुखेषु भक्तधिया |
यो जपति तस्य सिद्धिर्न दुर्लभा जायते च तापघ्नी ||6||

तव पादकमलसेवाहृतचित्तः साधकः समाहितधीः |
तरति महाभवदुर्गं विश्रुतकीर्तिप्रभावसौभाग्यः ||7||

त्वजपपूजाध्यानप्रभेदपरिनिष्ठितात्मधीर्मनुजः |
निःस्खोऽप्यकिंचनोऽपि त्रिभुवनविख्यातकीर्तिराशिः स्यात् ||8||

निधिवृंदमध्यगां त्वां ध्यात्वा मंत्रं यदा नरो जपति |
देवि तदास्य निवासं विशंति विविधार्थपूरिता निधयः ||9||

दिव्यान्नपूर्णपात्रं दवीं च करद्वयेन विभ्राणां |
ध्यात्वा यदि जपति त्वां प्रपूर्यते तस्य वेश्म धान्यौघैः ||10||

यस्मिन् वसति मनुष्यस्तव मंत्रविशेषजापको देशे |
तत्र न दीना वाणी प्रवर्तते देवि ``नास्ति नास्ती'' ति ||11||

अन्नाद्रिमध्यविस्फुरदंबुजमध्ये त्रिमंडलांतःस्थां |
ध्यायेद्यो दारिद्र्याद्विमुच्यते साधकः स एवाशु ||12||

इंद्राग्निसोमभास्करवरुणानिलघनदताक्ष्र्यकंदर्पाः |
विष्णुविरिञ्चप्रमुखा देवास्त्वद्ध्यानसंपदा प्रथिताः ||13||

युष्मदपांगघनोऽयं प्रशमितबहुदुःखधर्मतापौघः |
धारासारवनौघं वर्षतु मयि देवि सर्वदा कृपया ||14||

तत्र पाणिवल्लवस्था दर्वी दिव्यान्नपूरिता देवि |
दारिद्र्यदोषमुग्रं शमयतु मम संपदां वृद्धयै ||15||

वीक्षस्व मामनेकामयदुरितदुरंतदुःखपरितप्तं | (परितप्तां)
मातर्विभूतिमय्या दिव्यामृतसारधारया दृष्टया ||16||

अभिनवभास्करकोटिप्रभासमुद्भासितं हि ते रूपं |
हृदयांबुजमध्यगतं देवि समाधौ भजंति योगींद्राः ||17||

आदौ सृजसि च विश्वं प्रपासि सचराचरं जगद् भृयः |
संहरसि लोकमंते गुणत्रये सा त्वमेव देव्येका ||18||

मायोदधिरयमंब विषयग्राहोर्मिंदारुणो भवति |
त्वत्तापवाडवाग्नौ सोऽपि च विलयं प्रयाति तच्चित्रं ||19||

श्रीमद्गुरुप्रसादात्तत्त्वं तव योऽभिवेत्ति लोकेऽस्मिन् |
देवि स मनुजो लोके पारत्रिकमैहिकं शमभ्येति ||20||

हुतभ्रुङ्मंडलमध्ये विलसितरविबिंबमध्यगं त्वमृतं |
सोमात्मकं विदित्वा देवि त्वद्भावनेन पूतः स्यात् ||21||

गुरुवरपादपवित्रीकृतांतरात्मा प्रतापयित्वा त्वां |
देवि चिदग्नौ दीप्ते योगी योगामृतं जुहोत्येव ||22||

सकृदपि युष्मद्भक्तो दिव्यामृतमंब भावपात्रस्थं |
पिबति विदित्वा सम्यग् जीवन्मुक्तः स विज्ञेयः ||23||

योगामृतपूतात्मा योगी विजितेंद्रियारिजितसंगः | (संघः)
नहि जननीगर्भगृहं प्रविशति योगेशि योगभावितधीः ||24||

योगी त्वयाहिधत्ते संवित्तिपदे तदैव परितुष्टिं | (त्वयाधिधत्ते)
विधिहरिरुद्रादीनां गणयति न पदानि देव्यनित्यानि ||25||

षट्त्रिंशत्तत्त्वाख्यं शिवादिभूम्यंतमंब विश्वमिदं |
यस्योर्मिंबुद्बुदः स्यात् तत्ते संवित्तिमाश्रये धाम ||26||

मूलाधारनिवासा सूक्ष्मा सूर्यायुतोपमा शक्तिः |
निर्भिद्य षट्सरोजं यांती या सा त्वमेव शंभुपदं ||27||

षोडशपत्रसरोजात् स्रवन्महाधारया सहोद्दीप्ता |
यांती मूलनिवासं या हि कुळा कुंडली त्वमेवांब ||28||

जित्वा षट् पंच पुनर्निरुध्य दशकं तथैकमवलंब्य |
देवि तव रूपमब्जे हृदयस्थे संयमी स्मरति ||29||

स्थूलं तवांब रूपं योगिमनःपद्मकर्णिकासंस्थं |
योगविवृद्ध्यै सिद्धिं मम दिशतु समस्तवांछितावाप्त्यै ||30||

सूक्ष्मं तवांब रूपं सकलजगत्राणकारणोद्भूतं |
स्तोष्ये तदेव भक्त्या वांछितसिद्धिप्रदानसुरवृक्षं ||31||

श्रीदुर्गा वाग्देवी गिरिजा लिपिमातृका च मातंगी |
त्रिपुरा तथान्नपूर्णा राज्या रमा चेति कीर्तिता मुनिभिः ||32||

वाग्देवीं वागाप्त्यै दुर्गां भयशांतये श्रियं भूत्यै |
आराधयति मनुष्यः पुरुषार्थचतुष्कलब्धये त्रिपुराम ||33||

बहुरूपधारिणीं त्वां बहुधा प्रवदंति मानवा लोके |
गुरुमंत्रदेवतात्मस्वरूपिणीं भावयाम्यहं त्वेकां ||34||

कथमंब रूपमाद्यं तव रूपगुणाधिकं च चिन्मात्रं |
जानामि देवि तस्माद् दुरुक्तमीशि क्षमस्व तत् सर्वं ||35||

दारिद्द्र्यदुरितदुःखप्रशांतये व्याहृतं मया स्तोत्रं |
देवि सदा तं जपतां भक्तानां भवतु कामधेनुरिदं ||36||

स्तोत्रेण त्वं तुष्टा मयोदितेन प्रभूतधनधान्यैः !
पूरय वेश्म मदीयं विधेहि मयि सन्निधिं प्रपद्ये त्वां ||37||

इति अन्नपूर्णास्तवः संपूर्णः |